## तदस्मै दीयते नियुक्तम् । (६६/१६१७)

[1]तत् इति प्रथमासमर्थाद् अस्मा इति चतुर्थ्यर्थे ठक् प्रत्ययो भवति यत् तत् प्रथमासमर्थं तच्चेद् दीयते नियुक्तम् । नियोगेनाव्यभिचारेण दीयते इत्यर्थः । [2]अव्यभिचारो नियोगः । [3]अग्रे भोजनमस्मै नियुक्तं दीयते आग्रभोजनिकः । आपूपिकः । [4]शाष्कुलिकः । केचित्तु नियुक्तं नित्यमाहुः । अपूपा नित्यमस्मै दीयन्ते आपूपिकः ॥

## श्राणामांसौदनाट्टिठन् । (६७/१६१८)

श्राणामांसौदनशब्दाभ्यां टिठन् प्रत्ययो भवति तदस्मै दीयते नियुक्तम् इत्येतस्मिन्न[5]र्थे । ठकोऽपवादः । इकार उच्चारणार्थः । टकारो ङीबर्थः । श्राणा नियुक्तम् अस्मै दीयते श्राणिकः । श्राणिकी । [6]मांसौदनिकः । मांसौदनिकी । [7]अथ ठञेव कस्मान्नोक्तः, न ह्यत्र [8]ठञष्टिठनो वा विशेषोऽस्ति ? मांसौदनग्रहणं सङ्घातविगृहीतार्थं केचिद् इच्छन्ति, तत्र [9]वृद्ध्यभावो विशेषः । ओदनिकः । ओदनिकी[10] ॥

## भक्तादणन्यतरस्याम् । (६८/१६१९)

भक्तशब्दाद् अण् प्रत्ययो भवति अन्यतरस्यां तदस्मै दीयते [11]नियुक्तम् इत्येतस्मिन् [12]विषये । ठकोऽपवादः । पक्षे सोऽपि भवति । भक्तमस्मै दीयते नियुक्तम् [13]भाक्तः, भाक्तिकः ॥

## तत्र नियुक्तः । (६९/१६२०)

तत्र इति सप्तमीसमर्थान् नियुक्त इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । नियुक्तः अधिकृतो व्यापारितः इत्यर्थः । शुल्कशालायां नियुक्तः शौल्कशालिकः । [14]आकरिकः । आपणिकः । [15]गौल्मिकः । दौवारिकः ॥

## अगारान्ताट्ठन् । (७०/१६२१)

[16]अगारशब्दान्तात् प्रातिपदिकात् ठन् प्रत्ययो भवति तत्र नियुक्तः इत्येतस्मिन् [17]विषये । ठकोऽपवादः । देवागारे नियुक्तः देवागारिकः । [18]कोष्ठागारिकः । भाण्डागारिकः ॥

---

1. वाक्यमिदं नास्ति क.इ. 2. अव्यभिचारो नियोगः नास्ति ड. 3. अग्रभोजनं अस्मै एव देयम् इति आग्रभोजनिको विद्वान् ह. 4. मौदकिकः ह, क्षैरिकः इत्यधिकम् ब. 5. विषये ब.फ. 6. मांसिकः मांसिकी मांसौदनिकी फ. 7. ननु च अ.ड.ग.ह. 8. ठञः ठनो वा ड. 9. वृद्ध्यभावे क.ब. 10. श्राणिकीयम् इत्यधिकम् ब. 11. नियुक्तं नास्ति फ. 12. अर्थे ह.फ. 13. भाक्तं भाक्तिकम् ह. 14. आन्तरिकः इ.ह.ड, आतरिकः क. 15. धौल्किकः फ, नास्ति ब. 16. अगारान्तात् फ.ह. 17. अर्थे ह. 18. नास्ति ब.ड.ह.